# ॥ गणपति गकार अष्टोत्तरशतनामस्तोत्रम् ॥

गकाररूपो गम्बीजो गणेशो गणवन्दितः।
गणनीयो गणोगण्यो गणनातीतसद्गुणः॥ १॥

गगनादिकसृद्गङ्गासुतो गङ्गासुतार्चितः।
गङ्गाधरप्रीतिकरो गवीशेड्यो गदापहः॥ २॥

गदाधरनुतो गद्यपद्यात्मककवित्वदः।
गजास्यो गजलक्ष्मीवान् गजवाजिरथप्रदः॥ ३॥

गञ्जानिरतशिक्षाकृद्गणितज्ञो गणोत्तमः।
गण्डदानाञ्चितो गन्ता गण्डोपलसमाकृतिः॥ ४॥

गगनव्यापको गम्यो गमानादिविवर्जितः।
गण्डदोषहरो गण्डभ्रमद्भ्रमरकुण्डलः॥ ५॥

गतागतज्ञो गतिदो गतमृत्युर्गतोद्भवः।
गन्धप्रियो गन्धवाहो गन्धसिन्धूरबृन्दगः॥ ६॥

गन्धादिपूजितो गव्यभोक्ता गर्गादिसन्नुतः।
गरिष्ठो गरभिद्गर्वहरो गरलिभूषणः॥ ७॥

गविष्ठो गर्जितारावो गभीरहृदयो गदी।
गलत्कुष्ठहरो गर्भप्रदो गर्भार्भरक्षकः॥ ८॥

गर्भाधारो गर्भवासि-शिशुज्ञान-प्रदायकः।
गरुत्मत्तुल्यजवनो गरुडध्वजवन्दितः॥ ९॥

गयेडितो गयाश्राद्धफलदश्च गयाकृतिः।
गदाधरावतारी च गन्धर्वनगरार्चितः॥ १०॥

गन्धर्वगानसन्तुष्टो गरुडाग्रजवन्दितः।
गणरात्रसमाराध्यो गर्हणस्तुति-साम्यधीः॥ ११॥

गर्ताभनाभिर्गव्यूतिदीर्घतुण्डो गभस्तिमान्।
गर्हिताचारदूरश्च गरुडोपलभूषितः॥ १२॥

गजारिविक्रमो गन्धमूषवाजी गतश्रमः।
गवेषणीयो गहनो गहनस्थमुनिस्तुतः॥ १३॥

गवयच्छिद्गण्डकभिद्गह्वरापथवारणः ।
गजदन्तायुधो गर्जद्रिपुघ्नो गजकर्णिकः ॥ १४ ॥

गजचर्मामयच्छेत्ता गणाध्यक्षो गणार्चितः ।
गणिकानर्तनप्रीतो गच्छन् गन्धफली प्रियः ॥ १५ ॥

गन्धकादिरसाधीशो गणकानन्ददायकः ।
गरभादिजनुर्हर्ता गण्डकीगाहनोत्सुकः ॥ १६ ॥

गण्डूषीकृतवाराशिः गरिमालघिमादिदः ।
गवाक्षवत्सौधवासी गर्भितो गर्भिणीनुतः ॥ १७ ॥

गन्धमादनशैलाभो गण्डभेरुण्डविक्रमः ।
गदितो गद्गदारावसंस्तुतो गह्वरीपतिः ॥ १८ ॥

गजेशो गरीयान् गद्येड्यो गतभीर्गदितागमः ।
गर्हणीय गुणाभावो गङ्गादिकशुचिप्रदः ॥ १९ ॥

गणनातीत-विद्या-श्री-बलायुष्यादि-दायकः ।
एवं श्रीगणनाथस्य नाम्नामष्टोत्तरं शतम् ॥ २० ॥

पठनाच्छ्रवणात् पुंसां श्रेयः प्रेमप्रदायकम् ।
पूजान्ते यः पठेन्नित्यं प्रीतः सन् तस्य विघ्नराट् ॥ २१ ॥

यं यं कामयते कामं तं तं शीघ्रं प्रयच्छति ।
दूर्वयाभ्यर्चयन् देवमेकविंशतिवासरान् ॥ २२ ॥

एकविंशतिवारं यो नित्यं स्तोत्रं पठेद्यदि ।
तस्य प्रसन्नो विघ्नेशः सर्वान् कामान् प्रयच्छति ॥ २३ ॥

॥ इति श्री-गणपति गकार अष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ganapati_Gakara_Ashtottara_Shatanama_Stotram.
generated on **August 16, 2026**
Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits